International Journal of Jyotish Research: 2020; 5(2): 10-15

International Journal of Jyotish Research
(वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2020; 5(2): 10-15
© 2020 Jyotish
www.jyotishajournal.com
Received: 08-09-2020
Accepted: 11-10-2020

**डॉ. शुभस्मितामिश्रः**
सह–आचार्या, ज्योतिषविभागः,
राष्ट्रियसंस्कृतसंस्थानम्,
जयपुरपरिसरः, जयपुरम्, राजस्थान,
भारत

**Correspondence**
**डॉ. शुभस्मितामिश्रः**
सह–आचार्या, ज्योतिषविभागः,
राष्ट्रियसंस्कृतसंस्थानम्,
जयपुरपरिसरः, जयपुरम्, राजस्थान,
भारत

# ईतिसूचकग्रहयोगाः

**डॉ. शुभस्मितामिश्रः**

**प्रस्तावना**

सृष्टिक्रमेण आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी, पृथिव्या औषधयः, औषधिभ्योऽन्नं, अन्नात्पुरुषो च जायते इति । प्राणिनः अन्नमयकोशरूपं शरीरं प्राप्य वर्धन्ते जीवन्ति च । पुनश्च कालेन अन्नभूतायां पृथिव्यां च लीयन्त इति तैत्तिरियोपनिषदि उक्तं यथा [1]–

अन्नाद् भूतानि जायन्ते जातान्यन्नेन वर्धन्ते ।
अद्यन्तेऽत्ति च भूतानि तस्मादन्नं तदुच्यते ।।

अतः प्राणीनां उत्पत्तिर्स्थितिलयानां च कारणमन्नमेवाऽस्ति । तं च ब्रह्मरूपमन्नं न केवलं मनुष्याणामपितु देवासुराणां च जीवनस्याधारोऽस्ति । यथोक्तं पराशरेण [2] –

अन्नं प्राणाः बलं चान्नम् अन्नं सर्वार्थसाधकम् ।
देवासुरमनुष्याश्च सर्वे चान्नोपजीविनः ।।
"अन्नं वै प्राणाः" "कलावन्नगतः प्राणाः", शतपथब्राह्मणमतेन "अन्नो सोमाहुतिर्यज्ञाः"

तैतिरीयोपनिषदि अपि उक्तं वर्तते यथा [3] –

अन्नाद्येव खल्विमानि भूतानि जायन्ते अन्नेन जातानि जीवन्ति ।
अपि च [4] – अन्नमेव जगत्प्राणास्तन्मूलं भुवनं यतः ।

भार्गवपुराणानुसारमन्नमेव परमेश्वरस्य स्वरूपं तथा समस्तसंसारः अन्नात् प्रपंचित एव । अतः ब्रह्मादितृणपर्यन्तमखिलं जगत् सर्वमन्नमयम् । यथोक्तम् [5] –

अन्नमेव परब्रह्म प्रपंचत्वं च तत्कृतम् ।
प्रकृतिर्नास्ति संदेहः कथं चैतन्निबोध मे ।।
ब्रह्मादितृणपर्यन्तं यदेतदखिलं जगत् ।
सर्वमन्नमयं यस्मात् ब्रह्मा चेद् ब्रूहि पार्थिवम् ।।

अद् भक्षणे इति धातोः क्तप्रत्ययान्तस्य "अन्न" शब्दस्य व्युत्पत्ति अर्थात् प्राणिभिः भक्षितमिति । अन्नं धान्यसंजातम् । धान्यं कृष्या प्राप्यते अर्थात् कृष्या अन्नस्य प्राप्तिर्भवति । सा च कृषिः गृहस्थाचारधर्मस्य मूलभूता । चतुर्विधेषु आश्रमेषु गृहस्थाश्रमतः एव अन्येषामाश्रमाणां फलप्राप्तिर्भवत्यतः कृषेः महत्त्वं सर्वोपरि वर्तते । येन पुरुषार्थसिद्धिर्भवति । कृष्याभावे न संपत्स्यादिति दैवज्ञाः उक्ताः । यथोक्तं बृहत्दैवज्ञरंजने [6] –

गृहस्थाचारधर्मस्य मूलं कृषिरुदाहृता ।
अन्येषामाश्रमाणां तु गृहस्थाश्रमतः फलम् ।
तस्मात्कृषिविधानेन बीजनिर्वापणेन च ।
पुरूषार्थप्रसिद्धिः स्यादतस्तत्काल उच्यते ।।
अपि च [7] – अन्नं हि धान्यसंजातं धान्यं कृष्या विना न च ।
तस्मात् सर्वं परित्यज्य कृषिं यत्नेन कारयेत् ।।

तं च अन्नं पर्जन्यस्याधिनम् । यथोक्तं श्रीमद्भगवद्गीतायाम् [8] –

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यः यज्ञः कर्मसमुद्भवः ।।

अतः कृषिः जीवनं च उभयोऽपि पर्जन्यमूल एव । यथोक्तं पराशरेण [9] –

वृष्टिमूला कृषिः सर्वा वृष्टिमूलं च जीवनम् ।
तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत् ।।

अनेन ज्ञायते यत् वृष्टि–अन्न–जीवानां च परस्परमन्योन्याश्रयसम्बन्धो वर्तते । अस्य ब्रह्मरूपस्य जीवनरूपस्य अन्नस्य षड्विधानामीतीनां चर्चा अमरकोशटीकायां क्षीरस्वामिना कृता । तद्यथा [10] –

अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः ।
अव्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ।।

अर्थात् अतिवृष्टिः, अनावृष्टिः, मूषकाः, शलभाः, शुकाः, अव्यासन्नाः राजानश्च एते षड्विधाः ईतयः सन्ति । अन्यत्र षड्विधानां ईतीनां स्थाने अतिवृष्टिः, अनावृष्टिः, मूषकाः, शलभाः, शुकाः, स्वचक्रं परचक्रं चेति सप्तविधानां कृषेः उपद्रवविशेषाः वर्णिताः । यथोक्तम् [11] –

अतिवृष्टि अनावृष्टिः मूषकः शलभः शुकः ।
स्वचक्रं परचक्रं च सप्त ईतयः स्मृताः ।।

कृषेः षट्प्रकारोपद्रवविशेषाः सप्तप्रकारोपद्रवविशेषो वा तत्र अतिवृष्टिर्नाम अतिशयेन वृष्टिः" त्रिदिनातिरिक्तवृष्टिपरम् " अर्थात् वर्षाऋतुं विहाय अन्येषु ऋतुषु यदि दिनत्रयादधिककालं यावद् वृष्टिर्भवेत् तर्हि अतिवृष्टिः । वर्षणाभावः अनावृष्टिः । मूषकः जन्तुविशेषः, शलभः कीटविशेषः, शुकः पक्षिविशेषश्च । एतेषां वृद्धिः सस्यानां हानिं करोति । स्वचक्रं नाम गृहयुद्धम् । परचक्रं नाम अन्येन राज्येन स्वराज्यस्य राजनैतिकार्थिकधार्मिकशोषणं दमनं च । प्रत्यासन्ना नाम राज्ञः निकटवर्तिनः मन्त्रिपरिजनादयश्च। एते सर्वे कृषेः षट् सप्त वा उपद्रवाः सन्ति । अनावृष्ट्या प्रभावितक्षेत्रे अकालो भवति । यस्य अत्यन्तप्रतिकूलप्रभावः कृषिक्षेत्रोपरि पर्यावरणोपरि च पतति । अतिवृष्ट्यापि कृषिक्षेत्रं जलेनपूर्णं जातम् । येन सस्यानां महती हानिर्जायते । प्राकृतिकोपद्रवैः अतिवृष्टि–अनावृष्टि–मूषकः–शलभ–शुकानां च वृद्धिर्भवति । मानवकृतोपद्रवैः स्वचक्रं, परचक्रं, प्रत्यासन्नानामकोपद्रवाश्च भवन्ति । जगति सर्वेऽपि पदार्थाः पदाभिधेयाः भवन्ति । पदार्थबोधः व्युत्पत्तिं विना न जायते । अतः ईतिशब्दस्य व्युत्पत्तिः तावत् ई + क्तिन् इति शब्दः सिद्ध्यति । ईयतेऽनया इति ।

वस्तुतः सौरमण्डले विद्यमानाः सर्वेऽपि ग्रहाः दूरस्थिता अपि सुसम्बद्धाः स्वस्वप्रभावैः परस्परं प्रभावयन्ति । यथा ग्रहाणामुदयास्त–गति–स्थिति–संक्रमणादीनां निश्चितक्रमो वर्तते तथैव अवस्थानविशेषवर्तिनां तेषां परस्परं प्रभावा अपि सुनिश्चिताः सन्ति । तेषां अतिवृष्टिरनावृष्ट्यादि ईतिविषयकाणां प्रभावाणां चर्चा करिष्यामि । संहिताग्रन्थेषु राशिविशेषे समुदितानां गतानां च ग्रहाणां ईतिविषयकाणां प्रभावाणां उल्लेखं सम्यक् प्राप्यते । राशिविशेषे शुक्रस्यास्तंगमनं वृष्ट्यादिषु स्वीयं विशिष्टं प्रभावं प्रदर्शयति । अस्य वर्णनं मेघमालाग्रन्थे प्राप्यते। वृश्चिके धनुषि च यदि शुक्रः अस्तंगतो भवति तर्हि दुर्भिक्षं प्रजापीडाश्च करोति । मकरे धान्यानां क्षयस्तथा मेघाः स्वल्पं जलं वर्षति। शनिरपि राशिविशेषेऽस्तंगतो भवति तर्हि प्रजासु अन्नं दुर्लभं भवति। उक्तं यथा [12]–

कन्यायां धान्यदुर्भिक्षं प्रजापीडा प्रजायते ।
वृश्चिके धान्यनाशश्च जलं स्वल्पं प्रजायते ।।
धनुषे मन्दगे वाऽस्ते अन्नं भवति दुर्लभम् ।।

यदा पृथिव्यां मूषकशलभशुकादीनां वृद्धिर्भवति तदा एते महतीं सस्यहानिं च कुर्वन्ति । अथर्ववेदे "हतं तर्द–––आखुम " [13] इत्यनेन मन्त्रेण कृषेः नाशकरेभ्यो आख्वादिभ्यो सस्यानां रक्षणाय प्रार्थना कृता वर्तते । काश्यपीयकृषिसूक्तेऽपि मूषकादिभ्यः सस्यरक्षणस्य परमावश्यकतां प्रतिपादितं वर्तते । यथोक्तम् [14]–

मूषकात्शलभात्कीटात्शुकादपि च दुष्टतः ।
प्राणिवर्गाद्रक्षणं तु विशेषफलदं विदुः ।।

अपि च काश्यपीयकृषिपद्धत्याम् [15]–

शशमूषकमार्जारैः न दूष्या बीजसन्ततिः ।
जलराशिकणैर्वापि वातवृष्ट्यादिभिस्तथा ।।
यथा न दूषिता दोषैरन्यैरूच विविधैरपि ।

यदि राजा कृषिप्रवन्धनं न करोति, अकालवृष्टेरनावृष्टे वा काले सस्यानां रक्षणार्थं कृषकेभ्यश्च साहाय्यं न करोति तदाऽपि सस्यानां महती हानिर्भवति। वर्षप्रबोधस्य वृष्टिविचाराध्याये षड्विधानां वृष्टीनामुल्लेखः प्राप्यते । अतिवातयुक्तवृष्टिः, निर्वातवृष्टिः, अत्युष्णवृष्टिः, अनुष्णवृष्टिः, अल्पवृष्टिः, निरभ्रवृष्टिश्च। यथोक्तम् [16] –

अतिवातश्च निर्वातो ह्यतिचोष्णमनुष्णता ।
अल्पाभ्रं च निरभ्रं च षडेते वृष्टिलक्षणा ।।

संवर्तावर्तपुष्करद्रोणादयेषु चतुर्षु मेघेषु संवर्तकः अतिवृष्टिं, आवर्तक अनावृष्टिं च करोति । यथोक्तं राष्ट्रकल्पद्रुमे [17] –

आवर्तो निर्जलो मेघः संवर्तश्च बहूदकः ।
पुष्करो दुष्करजलो द्रोणो सस्य प्रपूरकः ।।

अतिवृष्टिरनावृष्टिश्चोभयमपि दुर्भिक्षं जनयतः । नियमितवृष्टिर्सर्वदा कृषेः हिताय जनहिताय च भवति । यथोक्तं मत्स्यपुराणे [18]–

अतिवृष्टिरनावृष्टिदुर्भिक्षादिभयं महत् ।

अपि च अग्निपुराणे [19] –

अतिवृष्टिरनावृष्टिः दुर्भिक्षायोभयं मतम्।

आदिपुराणानुसारं मध्यमावृष्टौ सर्वसस्यानां वृद्धिः तैश्च प्रजाः जीवनं धारयन्ति । यथोक्तम् [20] –

नातिवृष्टिरवृष्टिर्वा तदासीत् किन्तु मध्यमा ।
वृष्टिस्तु सर्वधान्यानां फलावाप्तिरविप्लुता ।।

अतः अतिवृष्टिरनावृष्टिरूपेभ्यः कृषीणां क्षतिभ्यो रक्षणाय अथर्ववेदे बहवः (6/50/142, 6/7/11) अभिचारपरकमन्त्राः उपलभ्यन्ते । अतिवृष्ट्यनावृष्टिनिरोधार्थं चतुर्णां ज्ञानमनिवार्यतया करणीयं भवति । तत्र नक्षत्राणां, मेघस्वरूपाणाम्, इन्द्रधनुषः, विद्युतां पर्यवेक्षणेन तज्ज्ञानं जायते ज्योतिषशास्त्रे संहिताग्रन्थाधारेण । वृष्टिविज्ञानं कृषिविज्ञानस्य मूलाधाररूपेण विद्यते । ज्योतिषशास्त्रस्य संहितास्कन्धे वृष्टेः निर्धारकसिद्धान्ताः सम्यक् निर्धारिताः सन्ति यतोहि मानवजीवनमन्नं विना न प्रचलिष्यति तथा चान्नस्योत्पत्तिः वर्षणं विना न संभवति । अतः वर्षणज्ञानार्थं विविधपरीक्षणमपेक्षते इत्यनुभूय गर्गकश्यपपराशरवराहमिहिरादयःदैवज्ञाः स्वस्वसंहिताग्रन्थेषु वृष्टिबोधकानि लक्षणानि निरूपितानि । तत्रापि ग्रहाणां गोचरीयप्रभाववशाद् सस्यानां निष्पत्तिज्ञानं प्रतिपादितानि । सूर्यस्य प्रतिराशौ प्रवेशानुरोधेन सस्यानां शुभाशुभत्वं वराहेण स्वकीयां

बृहत्संहितायां प्रतिपादितम् । सस्यानां निष्पत्तिः वृष्टेरधिनम् । वृष्टेः मुख्यकारकः सूर्यः । यथोक्तं मत्स्यपुराणे [21] –

सूर्य एव तु वृष्टिनां स्रष्टा समुपदिश्यते ।

मनुस्मृतौऽपि [22] –

आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ।

सूर्यस्य वृश्चिकराशिप्रवेशकालिकशुभग्रहस्थित्या ग्रीष्मधान्यं वर्द्धते । पापग्रहयोगेन क्षीयते च । एवमेव वृषराशिप्रवेशानुरोधेन शुभाशुभग्रहयोगैः शरदधान्यं वर्द्धते क्षीयते च । यथोक्तम् [23] –

वृश्चिकवृषप्रवेशे भानोऽर्थे वादरायणेनोक्ताः ।
ग्रीष्मशरत्सस्यानां सदसद्योगः कृतास्त इमे ।।
भानोरलिप्रवेशे केन्द्रैस्तस्माच्छुभग्रहाक्रान्तैः ।
बलवद्भिः सौम्यैर्वा निरीक्षिते ग्रैष्मिकविवृद्धिः ।।

वाल्मीकीयरामायणानुसारम् अनावृष्टे आध्यात्मिककारणमधर्मो मतः । वर्षाभिन्ने ऋतौ यदि दिवसत्रयं यावन्निरन्तरं वृष्टिर्भवेत्तर्हि जनजीवनाय भयं कृषेर्महती हानिश्च भवति । यथोक्तम् [24]–

अनृतौ त्रिदिनारब्धवृष्टिर्ज्ञेया भयाय हि ।

**ईतिसूचकग्रहयोगाः –**
महाभारतस्य वनपर्वे हनुमद्भीमसंवादे उक्तं वर्तते यत् ईतयः, व्याधयः, तन्द्रा, क्रोधादयदोषाः, उपद्रवाश्च एते मानसिकदुःखानां शारीरिकरोगाणां च कारकाः सन्ति । येषां निवारणं सर्वथा सुखप्रदम्। यथोक्तम् [25] –

ईतयो व्याधयस्तन्द्री दोषाः क्रोधादयस्तथा ।
उपद्रवाश्च वर्तन्ते आधयो व्याधयस्तथा ।।

विना जलदैः उपलानां वृष्टिः, विकृतानां प्राणीनां खरोष्ट्राऽश्वमार्जारश्रृगालप्रभृतीनां वृष्टिः, अतिवृष्टौ वापि छिद्रं च स्यात्तर्हि सस्यानामीतिसंजननमुपद्रवो भवति । यथोक्तम् **[26]** –

उपला विना जलधरैर्विकृता वा प्राणिनो यदा वृष्टाः ।
छिद्रं वाप्यतिवृष्टौ सस्यानामीतिसंजननम् ।।

साधारणसंवत्सरेऽपि अल्पं जलमतिवृष्ट्यादय उपद्रवाश्च भवति । यथोक्तम् [27] –

क्वचित्ववृष्टिः पवनाग्निकोपः सन्तीतयः श्लेष्मकृताश्च रोगाः ।
अपि च [28] –कष्टः प्लवंगो बहुशः प्रजानां साधारणेऽल्पं जलमीतयश्च।

कीलकनामकसंवत्सरे पित्तजन्यरोगानामाधिक्यं, मध्यमवृष्टिः, ईतिभयं तथा परिधावीनामकसंवत्सरेऽपि ईतिभयं भवति। यथोक्तम् [29]–

प्रचुराः पित्तरोगास्युर्मध्या वृष्टिरहेर्भयम् ।
कीलकाब्दे त्वीतिभयं प्रजाक्षोभः परस्परम् ।।
अनर्घ्याभयरोगेभ्यो भीतिरीतिनिरन्तरम् ।
परिधावीवत्सरे तु नृणां वृष्टिस्तु मध्यमा ।।

मार्गशीर्षेऽब्दे अनावृष्टिर्भवति । अरण्यपशवः, मूषकाः, शलभाः, कीटजातयः, पक्षिणश्च एतैः सस्यानां नाशो भवति तथा व्याधिभयं, भूपानां मित्रैरपि वैरं जायते। यथोक्तम् [30] –

सौम्येऽब्देऽनावृष्टिर्मृगाखुशलभाण्डजैश्च सस्यवधः ।
व्याधिभयं मित्रैरपि भूपानां जायते वैरम् ।।

बृहत्संहितायाः राहुचाराध्याये उक्तं वर्तते यत् सूर्यचन्द्रयोः ग्रहणकाले राहोः वर्णः यदि हरितवर्णाकारः स्यात्तर्हि पृथिव्यां रोगाणां प्राचुर्यम्, सस्यानामीतिभिरतिवृष्टिप्रभृतिभिरुपद्रवैश्च विनाशो भवति । तद्यथा [31] –

हरिते रोगोल्बणता सस्यानामीतिभिश्च विध्वंसः ।।

ग्रहणे तमोऽन्त्यनामके ग्रासे सस्यानामीतिभयं भवति ।

पर्य्यन्तेष्वतिबलं स्वल्पं मध्ये तमस्तमोऽन्त्याख्ये ।
सस्यानामीतिभयं भयमस्मिंस्तस्कराणां च ।। [32]

चन्द्रस्य ऐन्द्रे पर्वणि भूपानां परस्परं विरोधः तथा शारदानां धान्यानां क्षयो लोके क्षेमं च न भवति। गणितागतप्रग्रहणकालात् पश्चाद् दृक्प्रग्रहणं भवति तदा तत्पर्वातिवेला । अतिवेलापर्वणि कुसुमानां फलानां च क्षयो भवति। लोके भयं सस्यानां नाशश्च भवति [33]। पांशुरूपो मिश्रितवर्णाकारराहुश्च क्षत्रियाणां नाशाय वृष्टेश्च नाशाय भवति [34]।
नारदसंहितानुसारं मेषराशिगते धनुराशिगते च जीवे ईतिभयं भवति [35]। वशिष्ठसंहितानुसारं सूर्यस्य आर्द्रानक्षत्रप्रवेशकाले यदि वृष्टिः भवेत्तर्हि ईतिभयं दृश्यते। यथोक्तम् [36] –

प्रवेशकाले यदि रौद्रभस्य वृष्टिर्भवेदीतिरनर्घता च ।
शेषेषु पादत्रितयेषु भीतिरत्यल्पवृष्टिर्महती गदा च ।।

यदि सूर्यमण्डलं ग्रीष्मऋतौ रक्तवर्णाकारं दृश्यते तदा सर्वथा ईतिभयं करोति । अत्रैवोक्तं यत् सूर्यस्य तमोन्त्यनामके ग्रासे सस्यानां ईतिभयं डामरमधिकं च भवेत् । ग्रहणकाले यदि हरितवर्णाकारराहुबिम्बं दृश्यते तदा रोगानां वृद्धिः, ईतिभिः धान्यानां नाशो भवति । यथोक्तम् [37]–

लोहितवर्णो ग्रीष्मे लोकानामीतिदः शश्वत् ।
पर्यन्ते भवति तमो न तु मध्ये तमोऽन्तकः सोऽपि ।
ईतिभयं सस्यानां डामरमधिकं भवेत्तत्र ।।
हरिते त्वामयभीतिः सस्यानामीतिरोगभयम् ।

भद्रबाहुसंहिताग्रन्थे उक्तं यत् शुक्रसूर्ययोः एकराशौ स्थितत्वात् अत्यधिकभयं, अग्निना शीघ्रगर्भोत्पातः, व्याधयः, भयं, दारूणप्रकोपादिभिः जनाः त्रस्ताः भवन्ति । कृत्तिका–रोहिणी–चित्रा–अनुराधा–विशाखा–नक्षत्रेषु दक्षिणस्यां दिशि वर्षाकाले यदा शुक्रः गमनं करोति तदा विविधप्रकारस्य व्याधयः, ईतिः, महामारी, अनावृष्टिः, अतिवृष्टिः, महार्घः, जनमारी तथा धान्यानां निश्चयेन नाशः जायते अर्थात् उक्तनक्षत्रेषु यदा शुक्रः शीघ्रगत्या गमनं करोति वा अत्यधिकमन्दगत्यागमनं करोति तदा अशुभप्रभावेन जनाः पीडिताः भवन्ति [38]। बृहस्पतिः पंचसंवत्सरेषु नक्षत्राणां प्रतिलोमानुलोमरूपेण गमनं करोति तर्हि प्रजानां कष्टं भवति । बृहस्पतेः उक्तस्थितौ धान्यनाशः, अनावृष्टिः, तीव्रक्रोधः, रोगः, शस्त्रकोपः, अग्निकोपः, मूर्च्छा तथा भयमुत्पद्यते । केतुः बृहस्पतिश्च यदा दक्षिणमार्गगामी भवति तदा अनावृष्टिः तथा जनाः तीव्रज्वरेण मृत्युं प्राप्नुवन्ति। कृत्तिकारोहिणीनक्षत्रे बृहस्पतेः मूर्तिः, आश्लेषानक्षत्रं बृहस्पतेः हृदयः, पूर्वाषाढा–अभिजित्–उत्तराषाढा–पुष्य–मघा–नक्षत्राणि बृहस्पतेः नाभिः कल्प्यते । बृहस्पतेः मूर्तिसंज्ञकयोः नक्षत्रयोः कृत्तिकारोहिण्योः घातो भवति तर्हि विविधप्रकारस्य व्याधयः तथा हृदयसंज्ञकनक्षत्रस्य घातेन हृदयरोगमुत्पद्यते । पुष्यनक्षत्रस्य घातेन पुष्प–फल–पल्लवानां नाशस्तथा अग्नि–मूषक–सर्प–शलभा–शुकानां च उपद्रवाः, ईति

अर्थात् महामारी, धान्यघातः, स्वशासने मित्रता, परशासने जलाभावश्च जायते [39]।
पराशरमते यदा मंगलग्रहः ध्रुवनक्षत्रे श्रवणहस्तमूलज्येष्ठाकृत्तिकामघासु अन्यतमे नक्षत्रे च अवस्थितो भवति तदा अनावृष्टिर्भवति । मघाविशाखारोहिणीनक्षत्राणां योगतारकान् भिद्यति तदा दुर्भिक्षं मरणं रोगं च करोति । उत्तरात्रयस्य मूलश्रवणज्येष्ठानां च दक्षिणं गमनं गृहयुद्धं च करोति । यथोक्तम् [40] –

ध्रुवे च वैष्णवे हस्ते मूले शुक्रे चरन् कुजः ।
सद्यः करोत्यनावृष्टिं कृत्तिकासु मघासु च ।।

ज्योतिषदृष्ट्या रोहिणीनक्षत्रं वर्षासम्बद्धं नक्षत्रम् । यदा शनिः रोहिणीशकटमतिक्रम्य भौमशुक्रयोः समीपगतो भवति तदा द्वादशवर्षपर्यन्तमनावृष्टिर्जायते । प्रतिकूलायां वृष्ट्यां तु सर्वेऽपि कृषिशिल्पवाणिज्यादयो व्यवसायाः कुप्रभाविता भवन्ति । अकाले भवा वृष्टिः विविधान् रोगानपि जनयति । प्राच्यसंस्कृतग्रन्थेषु वृष्ट्यभावे वृष्टिप्रवर्तनाय मंत्रहवनाद्यात्मका विधयो वर्णिताः सन्ति। जले इन्द्रायुधस्य दर्शनमनावृष्टिं करोति । वृष्टिजलपतनकाले इन्द्रायुधस्य दर्शनमनावृष्टिं च करोति । ज्योतिषशास्त्रस्य संहितास्कन्धे सूर्यादिग्रहाणां चारवशाद् इतीनां विचारः प्राप्यते । तामसकीलकसंज्ञकाः त्रयस्त्रिंशत् राहुपुत्राः यदि सूर्यमण्डलगताः दुष्टफलप्रदा भवन्ति । वराहमतेन सूर्यबिम्बं वर्षाकाले यदि कृष्णवर्णाकारं दृश्यते तर्हि अनावृष्टिं करोति ।

ग्रीष्मे रक्तो भयकृद्वर्षास्वसितः करोत्यनावृष्टिम् [41]।

पुनश्चार्के श्यामवर्णे कीटभयं सस्यानां भवति । भस्मवर्णे परचक्राद्भयं च भवति । नारदसंहितायां पुनः ऋतुवशाद् वर्णफलमपि निरूपितं वर्तते । तद्यथा [42] – ग्रीष्मऋतौ सूर्यः श्वेतवर्णः, वर्षाऋतौ चित्रवर्णः, शरदऋतौ पद्मपरागसदृशवर्णो, हेमन्ते लोहितवर्णो वा भवति तदा अनावृष्टिभयं करोति।

अपाण्डुरः स्वर्णवर्णो ग्रीष्मे चित्रो जलागमे ।
पद्मोदराभः शरदि हेमन्ते लोहितच्छविः ।
हेमन्ते प्रावृषि ग्रीष्मे रोगाणां वृष्टिभीति कृत् ।।

बृहत्संहितायाः आदित्यचाराध्याये वर्णितोऽस्ति यत् सूर्यस्य ऊर्ध्वस्थिता रश्मयः यदा चित्रवर्णा धूम्रवर्णा वा दृश्यते तदापि वृष्टेर्नाशो भवति । सूर्यः यस्मिन् वर्षेऽब्देश्वरो वा सस्येशो भवति तस्मिन् वर्षे पर्वतसदृशमेघाः अपि प्रभूतं जलं नैव मुंचन्ति । यथोक्तम् [43] नात्यम्बुदा जलमुचोऽचलसन्निकाशाः । सूर्यः यदा भौमस्य पृष्ठगतो भवति तदा समुद्रमपि शोषयति । विपरीतस्थित्या अर्थादग्रगतो भवति चेत् पर्वतानपि प्लावयति । यथोक्तं कृषिपाराशरे [44] –

कुजपृष्ठगतो भानुः समुद्रमपि शोषयेत् ।
स एव विपरीतस्तु पर्वतानपि प्लावयेत् ।।

यस्मिन्नक्षत्रे स्थितः सच्छिद्रः सूर्यो दृश्यते तन्नक्षत्रं यस्य राज्ञः कूर्मविभागेन भवति तस्य मृत्युर्भवति [45]। चन्द्रस्य युगसंस्थाने दक्षिणश्रृंगं किंचिदुत्तुंगं भवति तदा वृष्टेः नाशो भवति । चन्द्रश्रृंगं यदा अधोमुखं भवति, बुधेन आहतं भवति तदा अवृष्टिं, भयं, दुर्भिक्षं च करोति [46]। यदि चन्द्रः भस्मवर्णयुक्तः, रूक्षः, रक्तवर्णयुक्तः, कृष्णवर्णयुक्तः, खण्डितः, स्फुरणयुक्तः, स्फुटितः(भग्नः) च दृश्यते तदा दुर्भिक्षं करोति [47]। चन्द्रः यदा ग्रस्तोदितो ग्रस्तास्तमितो वा भवति तदा शारदीयधान्यस्य विनाशकर्ता भवति । सर्वग्रस्तौ सूर्यचन्द्रौ यदि पापसंदृष्टौ भवतः तदा दुर्भिक्षं, मरकं च ददाति । पश्चिमदिग्गतः राहुः बीजानां नाशं करोति [48]। ग्रहणकाले सूर्यचन्द्रबिम्बयोः परिध्यन्तर्भागेषु तमः अतिबहुलं मध्ये स्वल्पं च दृश्यते तदा सस्योपद्रवो भवति । पौषमासे यदि सूर्यचन्द्रयोः ग्रहणं भवति तदा अल्पवृष्टिं भयं दुर्भिक्षं च भवति [49]। ग्रहणे मोक्षे दिनसप्तकमध्ये यदि इन्द्रधनुषः दर्शनं भवेदथवा रविकिरणजलदमरूतां संघातः भवेत् तर्हि क्षुद्भयं परचक्रभयं च करोति । उदयनक्षत्रात् द्वादशे नक्षत्रे, दशमे एकादशे वा कुजे वक्रिते अल्पवृष्टिं करोति । अस्तनक्षत्रात् सप्तदशतमनक्षत्रे, अष्टादशतमनक्षत्रे वा भौमः यदा वक्रगतिं प्राप्नोति तदा अवृष्टिं, शस्त्रभयं च करोति । मघानक्षत्रगतभौमः यदा वक्रगतिं प्राप्नोति तदा अवृष्टिं करोति । भौमः यदा रोहिणीनक्षत्रस्य दक्षिणतः गमनं करोति तदापि अल्पवृष्टिं करोति । कृषिपराशरमतानुसारं भौमः यदा सिंहराशौ भवेत् तदा वृष्टेः अभावो भवति परं सिंहराशिगतो भौमः यदा सूर्येण साकं वर्तते तदा समुद्रमपि शोषयति । यथोक्तम् [50] –

अंगारको यदा सिंहे तदांगारमयी मही ।
स एव रविणा युक्तः समुद्रमपि शोषयेत् ।।

बुधग्रहस्य उदयादेव अनावृष्टिर्भवति । बुधः यदा श्रवणधनिष्ठारोहिणीमृगशीर्षोत्तराषाढानक्षत्रान् भेदं कृत्वा विचरति तदा अनावृष्टिर्भवति । तीक्ष्णयोगान्तघोरपापाख्यासु गतिसु बुधः अनारोग्यमनावृष्टिः सस्यानामवृद्धिं च करोति [51]। नारदीयज्योतिषसंहितानुसारं बुधग्रहस्योदयात् प्रकृतौ उत्पाताः दृश्यन्ते । यथा अनावृष्टिः, नृपविग्रहं च दृश्यते । तद्यथा [52] –

विनोत्पातेन शशिजः कदाचिन्नोदयं व्रजेत् ।
अनावृष्ट्यग्निभयकृदनर्थं नृपविग्रहम् ।।

मार्गशीर्षनक्षत्रगतगुरोः यदा उदयो भवति तदा अनावृष्टिस्तथा धूम्रवर्णाकारं बृहस्पतेः बिम्बमनावृष्टिं करोति । प्रभवसंवत्सरे क्वचिदवृष्टिः, क्वचिदतिवृष्ट्यादि षड्विध ईतयः दृश्यन्ते [53]। श्रीनारदीयज्योतिषसंहितायां सम्बत्सरफलावसरे कृषेः उपद्रवविशेषानां पर्याप्तचर्चा प्राप्यते । धातानामकसंवत्सरे राजानः परस्परजयोत्सुकाः भवन्ति । प्रमाथ्यब्दे मेघा कुत्रचित् प्रचुरं पयः न मुंचन्ति । विकृतिखरसम्वत्सरद्वये राष्ट्रविकृतिः, राजानः परस्परविरोधतः विलयं च यान्ति । विजयाब्दे अतिवृष्ट्या राजभिश्च सस्यानां हानिर्भवति । विलम्बसंवत्सरे राजविग्रहः, अतिवृष्टिः, जनाः आतंकपीडिता च भवन्ति । अनलवत्सरे अनलभयं, मध्यवृष्टिः, अनर्घता, नृपाः संक्षोभयुक्ताः, नृपाणां मध्ये भूरिविरोधं च भवति [54]। भाद्रपदवर्षे रवीसंज्ञकसस्यानां हानिः, शासकवर्गेषु परस्परविग्रहः, क्वचित् अतिवृष्टिः, क्वचित् अनावृष्टिश्च भवति । धूमवर्णाकारगुरुः अनावृष्टिं करोति । दिवा गुरोः दर्शनं नृपवधः, राज्यनाशं च करोति । सिंहराशिगते जीवे अतिवृष्टिः, व्यालभयं तथा नृपाः युद्धे लयं भवन्ति । वृश्चिकराशिगते जीवे युद्धे भूपानां जनपदानां च क्षयो भवति तथा अतिवृष्टिर्भवति । मघादिपंचनक्षत्रेषु शुक्रस्योदयः यदा पश्चिमदिशायां भवति तदा अनावृष्टिः तथा स्वात्यादिनक्षत्रत्रये यदा शुक्रस्योदयः पूर्वस्यां दिशि भवेत् तदा अनावृष्टिर्भवति । शुक्रस्याग्रे यदा भौमगुरुबुधशनयः भवन्ति तदा युद्धातिवायुदुर्भिक्षं जलनाशं च भवति । मूलनक्षत्रगतशनिः क्षुच्छस्त्रावृष्टिदो भवति । ऐन्द्रनामके ग्रहणे नृपाणां परस्परविरोधः, सस्यहानि च भवति । याम्यपर्वे अनावृष्टिः, सस्यहानिः च भवति [55]। स्वाती–आर्द्रा–पुनर्वसु–आश्लेषा–पूर्वाफाल्गुनी– नक्षत्रेषु गतः शुक्रः अतिवृष्टिं करोति। गोचरे यदा गुरुशुक्रौ परस्परं सप्तमराशिगौ भवतः तदा अनावृष्टिर्भवति । गोचरे यदा शुक्रादग्रे भौमस्य गमनं भवेत् तदा अनावृष्टिर्भवति । शुक्रस्य मृगशीर्षनक्षत्रे गमनात् रसानां धान्यानां च नाशः जायते । आर्द्रागतस्तु कौशलान् कलिंगांश्च हन्ति तथाऽतिवृष्टिं करोति [56]। स्वाती–पुष्यनक्षत्रयोरपि भूरिवृष्टिं करोति । मघापूर्वाफाल्गुनीनक्षत्रं च यदा शुक्रः भिन्दति तदातिवृष्टिं करोति । हस्त–अनुराधा–ज्येष्ठा–मूलनक्षत्रेषु स्थिते शुक्रेऽवृष्टिं करोति । बृहत्संहितायां तिथिषु शुक्रग्रहस्योदयास्तफलविचारावसरे उक्तं वर्तते यत् कृष्णपक्षस्य चतुर्दशी–पूर्णिमा–अमावस्याष्टमीतिथिं वा समाश्रित्य यदा

शुक्रस्योदयमथवा अस्तमयं भवति तदा मही जलेन पूर्णा दृश्यते । यथोक्तम् [57]–" चतुर्दशीं पंचदशीं तथाष्टमीं ..." । कृष्णवर्णाकारशुक्रः अवृष्टिं च करोति । मूलनक्षत्रगतशनिः अवृष्टिं करोति । यदा मूलनक्षत्रे शनिः प्रविशति तदा दुर्भिक्षमनावृष्टिश्च भवति । यदा शनिः एकवर्षे राशिद्वयं गच्छति तदा नृपेषु परस्परं मतभेदस्तथा शस्त्रकोपः जायते । शत्रोः आतंकेन भयेन च मर्यादा नष्टः भवति तथा वर्षाकाले विषमा वृष्टिः व्याधिकोपश्च जायते [58]।

एवमेव ग्रहचारवशादतिवृष्टिरनावृष्ट्यादिनां ईतीनां विचारः संहिता ग्रन्थेषु प्राप्यते । यदा सूर्यस्य बिम्बं मयूरपत्रसदृशं प्रतीयते तदा द्वादशवर्षाणि यावत् वृष्टिः नैव भवतीति नारदसंहितायामुल्लिखितमस्ति [59]।

मयूरपत्रसंकाशो द्वादशाब्दं नैव वर्षति ।

एकस्मिन् वृक्षे नानाविधानां फलानां पुष्पाणां च उत्पत्तिर्यदि भवति तदा निश्चयात् परचक्रस्यागमनं भवति [60]। सायंकाले चन्द्रादयो ग्रहाः प्राच्यां दिशि ध्वजवत् अवस्थिताः अथवा रूक्षाः भवन्ति तदा प्राच्यदेशीयनृपाणां विग्रहो भवति [61]। कृत्तिकादि सप्तनक्षत्रेषु शनिः यदा वक्रत्वं प्राप्नोति तदा दुर्भिक्षं, नक्षत्रोक्तदेशेषु मित्राणां परस्परं विरोधम् अल्पवृष्टिं च करोति [62]। धनुषाकारः, रूक्षः, रक्तवर्णाकारश्च चन्द्रः दुर्भिक्षं, सैन्यानां युद्धं च करोति । गवां श्रृंगवत् चन्द्रश्रृंगं धान्यानां नाशं करोति । धूमवत् चन्द्रश्रृंगं नृपस्य मरणाय एव भवति [63]। सूर्योदयास्तकाले वा पताकायुतगन्धर्वनगरप्रतिमा सूर्यबिम्बम् आच्छादयति तदा देशे संग्रामभयं जायते [64]।

पराशरमतेन गन्धर्वनगरेण साकं सूर्योदयो भवति चेत् परचक्रभयं जायते [65]। भद्रबाहुसंहितानुसारं गन्धर्वनगरं यदा दक्षिणस्यां दिशि दृश्यते तदा परचक्रभयं भवति [66]। यदि तं गन्धर्वनगरं विशीर्णं प्रतीयते तर्हि राष्ट्रे बलक्षोभो जायते [67]। गन्धर्वनगरं यदा आयुधेन व्याप्तं स्यात्तदा परचक्रभयं भवति [68]। चन्द्रस्य दक्षिणश्रृंगं च स्थूलमुत्तरश्रृंगं च हीनकायं दृश्यते तदा पृथिव्यां अचिरात् अन्ननाशो दुर्भिक्षं च भवति [69]। एवमेव बहवः योगाः निमित्तलक्षणानि च संहिताग्रन्थेषु उल्लिखितानि सन्ति ।

सस्यं मेदिन्याः परमोधर्मः परमोयशश्च यतोहि मेदिनी प्राणीनां प्राणवर्धिनी । इत्यस्य चर्चा काश्यपीयकृषिपद्धत्या– मुल्लिखितमस्ति।

यज्ञानामपि चाधारः प्राणीनां जीवदायकम् ।
कृषिकर्म प्रशंसन्ति मुनयो दिव्यचक्षुषः ।।
सस्यादिरेव मेदिन्याः परोधर्मः परं यशः ।
सस्यपूर्णा वसुमती प्राणीनां प्राणवर्धिनी ।।[70]

शरीरमाद्यं खलुधर्मसाधनमित्यनेन सर्वेषामपि धर्माणां कर्मणां च साधनभूतस्य शरीरस्य पोषकत्वान् "लौकिकवैदिकमोक्षकर्मसु अन्ने प्रतिष्ठितमस्ति [71] " अतः अन्नानां रक्षणं मूषकात्, शलभात्, शुकात्, दुष्टजनात् तथा अन्याद् हानिकारकत्वात् च सर्वदा करणीयम्। यथोक्तम् [72] –

मूषकात् शलभात्कीटात् शुकादपि च दुष्टतः ।
प्राणिवर्गाद्रक्षणं तु विशेषफलदं विदुः ।।

काश्यपीयकृषिपद्धत्यानुसारं "महीपाले प्रसन्ने तु सर्वं सिद्ध्यति भूतले " [73] । यदि राष्ट्रस्य नृपः राज्यशासनेन साकं कृषिकार्यमुपरि विशेषध्यानं ददाति तर्हि कृषेः उत्पादनस्य बाहुल्येन राष्ट्रस्य आर्थिकस्थितिः सुदृढो भवति यतोहि कृषिप्रबन्धनं राजकीयदायित्वमासीत् न केवलं कृषकस्य। नृपस्य मूलदायित्वं भवति देवानां प्रशन्नार्थं, प्रजानां सुरक्षार्थं च कृषिकर्मणि जायमानानां समस्यानां निवारणं कृत्वा कृषिकर्मणः प्रोत्साहनम् । एवमेव पुरोहितानां, ब्राह्मणानां, सचिवानां च मूलकर्तव्यं भवति प्रजानां रक्षणार्थं तत्परनृपान् सर्वदा कृषिकार्यार्थं प्रेरणा प्रदानम् । यतोहि जीवने वा राज्ये सर्वेषु कार्येषु महत्त्वपूर्णकार्यं, श्रेष्ठकार्यं च कृषिकर्म भवति । अतएव नृपस्य प्रथमश्रेष्ठकर्तव्यं भवति कृषकाणां, कृषीणां च सुरक्षा । यदि राष्ट्रे कृषिकर्मसुरक्षितो भवति चेत् राष्ट्रस्योन्नतिः, राष्ट्रस्य विकाशः स्वतः जायते । सर्वाः प्रजाः राष्ट्रस्य हितचिन्तने रताः भवन्ति । राष्ट्रे सर्वत्र शान्तिर्भवति [74]।

काश्यपीयकृषिग्रन्थोक्त नृपस्य यद् दायित्वं प्राचीनकालेऽऽसीत् तदेव दायित्वं सर्वकारस्य अद्यतनकालेऽपि वर्तते । कृषिकार्यसम्पादनार्थमद्यतनकालेऽपि सर्वकारः बैंकमाध्यमेन धनं ददाति। यदि कृषिः अतिवृष्टिवशात् अनावृष्टिवशात् च नष्टं भवति तर्हि सर्वकारः कृषिनिमित्तप्रदत्तं ऋणं पुनः न स्वीकरोति तथा च पुनः आगामी कृषिकार्यस्य कृते धनं प्रयच्छति ।

अस्माकं भारतदेशस्य अर्थव्यवस्थायाः प्रमुखस्रोतः वर्तते कृषिः । भारतभूखण्डस्य 51ः प्रतिशतभूभागः कृषिकार्ये नियुक्तः वर्तते तथा भारतस्य जनसंख्यायाः 58 प्रतिशतजनाः कृषिमुपरि आश्रिताः सन्ति । अतः भारतीयसमाजे आजीविकात्वेन प्रमुखतया गौरवपूर्वकं कृषिकर्म गृहीतम् । मानवजीवने कृषेः महत्त्वं प्रतिपादयता पराशरेण प्रतिपादितं यत् [75] –

सुवर्णरौप्यमाणिक्यवसनैरपि पूरिताः ।
तथापि प्रार्थयन्त्येव कृषकान् भक्ततृष्णया ।।

## संधर्व ग्रन्थ सूचि


1. तै.उ.ब्रह्मानन्दवल्ली, अनुवाकः –2
2. कृषिपाराशरः – 6
3. तै.उ., 3/2
4. वनमाला, 1/3
5. बृहद्दैवज्ञरंजनम्, प्र. 63, श्लो. 1–2,
6. बृहद्दैवज्ञरंजनम्, प्र. 77, श्लो. 2–3,
7. कृषिपाराशरः – 7,
8. श्री. भ.गीता, 3/14
9. कृषिपाराशरः – 10
10. अमरकोशः
11. नारदीयज्योतिषसंहिता, अ. 2, पृ. 28,
12. मेघमालायाम्
13. अथर्ववेदः, 6/50/1
14. का.कृ.सू. 475
15. का.कृ.पद्धतिः.बीजवापनार्थं भूकर्षणक्रमः, श्लो. 404, 405,
16. वर्षप्रबोधः, वृष्टिविचाराध्यायः, श्लो. 200
17. राष्ट्रकल्पद्रुमः, भाग–3, पृ. 776
18. अद्भुतसागरः, अतिवृष्ट्याद्यद्भुतावर्त
19. अग्निपुराणम्, 16/3/19
20. आदिपुराणम् 3/185
21. म. पु. 124/27
22. मनुस्मृतिः अ. 3, श्लो. 76
23. बृ. सं. अ. 40, श्लो 1–2
24. अग्निपुराणे 163,19
25. महाभारतम्, 3/148/34
26. बृ. सं. उत्पाताध्यायः, श्लो 42
27. बृ. सं. बृ, चा. श्लो 28
28. बृ. सं. बृ, चा. श्लो 44
29. बृ. सं. ना,सं. अ. 3 श्लो 58,62
30. बृ. सं. बृ, चा. श्लो 4
31. बृ. सं. रा, चा. श्लो 54
32. बृ. सं. रा, चा. श्लो 52
33. बृ. सं. रा, चा. श्लो 29
34. बृ. सं. रा, चा. श्लो 59
35. नरदसंहिता अ.2
36. व.सं.अर्कचाराध्यायः, श्लो. 9
37. वृ.सं.अर्कचाराध्यायः, श्लो. 18,25,27
38. भद्रबाहुसंहिता, अ.15, श्लो. 75,76,84,85

39. भद्रबाहुसंहिता, अ.17, श्लो.9,15,22,23,26,27
40. कृषिपराशरे 75, तथा नारदसंहिता, अ. 2, श्लो. 46,48,
41. बृ. सं. आ.श्लो.26
42. नरदसंहिता, आदित्यचाराध्यायः, 17/18
43. बृ.सं.ग्रहवर्षण.श्लो. 2
44. कृषिपराशरः, अनावृष्टिलक्षणम् श्लो. 76
45. बृ. सं. आ.श्लो.29
46. बृ. सं.चं चा. श्लो. 21
47. बृ. सं. चं.चा.श्लो.29
48. बृ. सं. चं.चा.श्लो.27
49. बृ. सं. रा.चा.श्लो.71
50. कृषिपराशरः, अनावृष्टिलक्षणम् श्लो. 77,78
51. बृ. सं. बु.चा.श्लो.24
52. ना.सं.अ. 2, श्लो. 49
53. बृ. सं. वृ.चा.श्लो.71
54. ना.सं., अ.3, श्लो.26,29,40,43,48,66
55. ना.ज्यो.सं.अ.2, श्लो.77,81,89,93,102,105,107,116,118,
56. बृ. सं. शु.चा.श्लो.16
57. बृ. सं. शु.चा.श्लो.36
58. भद्रबाहुसंहिता, अ.16, श्लो.6,7
59. ना. सं. आ.श्लो.20
60. बृ. सं. उत्पाता. श्लो.34
61. बृ. सं. मयूरचित्राध्यायः, श्लो.7
62. बृ. सं. मयूरचित्राध्यायः, श्लो.13,
63. बृ. सं. मयूरचित्राध्यायः, श्लो.16,
64. बृ. सं. मयूरचित्राध्यायः, श्लो.26
65. अद्भुतसागरः, ग.न.अद्भुतावर्तः
66. भद्रबाहुसंहिता, अ.11, श्लो.15
67. भद्रबाहुसंहिता, अ.11, श्लो.18
68. अद्भुतसागरः, ग.न.अद्भुदावर्तः
69. अद्भुतसागरः, च.अद्भुदावर्तः, गर्गमतम्
70. का.कृ.पद्धतिः, धान्यादिकृषिक्रमकथनम् 235, 18,
71. च.स.सूत्रस्थानम् 27/349/350
72. का.कृ.पद्धतिः, 475,
73. का.कृ.पद्धतिः, 179,
74. का.कृ.पद्धतिः, 127,128,129
75. कृषिपराशरः, कृषिमहत्त्वम्, श्लो. 4,